# UpadeshasaraBhashyam

# ઉપદેશસારભાષ્યમ્

## Document Information

Text title : Upadeshasarabhashyam

File name : upadeshasArabhAShyam.itx

Category : major_works, gaNapati-muni, bhAShya

Location : doc_z_misc_major_works

Author : Vasishtha Ganapati Muni's Sanskrit Commentary on Ramana Maharshi's Upadeshasaram

Proofread by : Sunder Hattangadi

Description-comments : The Collected Works of Vasishtha Kavyakantha Ganapati Muni Vol 07-31

Latest update : July 24, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 5, 2025

*sanskritdocuments.org*

# ઉપદેશસારભાષ્યમ્

॥ શ્રીઃ ॥

અથ રમણસ્ય ભગવતો મહર્ષેરુપદેશસારં વ્યાખ્યાસ્યામઃ ।
તસ્યાયમાદિમઃ શ્લોકો ભવતિ ॥

કર્તુરાજ્ઞયા પ્રાપ્યતે ફલમ્ ।
કર્મ કિં પરં કર્મ તજ્જડમ્ ॥ ૧॥

મીમાંસકાભિમતં ફલપ્રદત્વે કર્મણઃ પ્રાધાન્યં ખણ્ડયિતુમયમારમ્ભઃ ।
ફલં કર્તુરીશ્વરસ્ય આજ્ઞયા પ્રાપ્યતે । કર્મ પરં કિમ્ ।
નેત્યર્થઃ । તત્કર્મ જડં ભવતિ ।
કર્મણઃ પરત્વાભાવાય જડત્વમત્ર હેતુત્વેનોપન્યસ્તમ્ ।
કર્મ યસ્માજ્જડં તસ્માન્ન પરમિતિ યાવત્ ।

નનુ, ન વયં કર્મણઃ પરત્વમુદ્દિશ્ય વિવદામઃ । ફલપ્રદત્વે કર્મણઃ પ્રાધાન્યમિત્યેવાસ્માકં વાદઃ । માસ્તુ પરં કર્મ । તથાઽપિ સ્વજન્યાપૂર્વદ્વારા ફલપ્રદં ભવેત્ । એવં હિ પ્રમાણભૂતાનિ વૈદિકવાક્યાનિ સઙ્ગચ્છેરન્નિતિ ચેત્ ।

ન । જ્યોતિષ્ટોમાદીનાં સ્વર્ગસાધકત્વાદિબોધયતાં વાક્યાનાં પરમેશ્વરસ્ય શુભાશુભફલપ્રદત્વે કર્મસાપેક્ષત્વોક્તેરપિ સમન્વેતું શક્યત્વાત્ । અપિ ચ શુભાશુભફલપ્રદત્વં ચ સર્વેષાં જગન્નિયામકત્વાન્નાતિરિચ્યતે । તજ્જગન્નિયામકં તદેવ પરં સ્યાત્ । અત એવ કર્મવાદિનો દૈવશબ્દેન તજ્જન્યાપૂર્વં વદન્તિ । મહર્ષિશ્ચ કર્મ કિં પરમિત્યત્ર તદપૂર્વમેવોદ્દિશતિ, વ્યવહારેષુ કર્માપૂર્વયોરવિભક્તત્વાત્ । તસ્માન્ન વયં કર્મ પરં વદામ ઇતિ પૂર્વપક્ષિણા વક્તુમશક્યમ્ । અયં ભાવઃ । મીમાંસકકલ્પિતમપૂર્વં જડત્વાન્ન પરમ્ । ન ચ શુભાશુભાનિ ફલાનિ સ્વતન્ત્રતયા દાતુમીષ્ટે । ગૌરવં ચ ભવતિ તસ્ય કલ્પન ઈશ્વરસ્યૈવ સાપેક્ષસ્ય કર્મફલદાતૃત્વે પ્રમાણવાક્યાનામબાધાત્ ।

કૃતિમહોદધૌ પતનકારણમ્ ।
ફલમશાશ્વતં ગતિનિરોધકમ્ ॥ ૨॥

ફલં કર્મફલં અશાશ્વતં સત્, ભોગેનાવક્ષીણમનુશયમાત્રશેષમિતિ યાવત્ । કૃતિમહોદધૌ કર્મમહાસમુદ્રે પતનકારણં ભવતીતિ શેષઃ । યદિ ફલં શાશ્વતં સ્યાત્ તર્હિ પુનરાવૃત્તિર્ન સ્યાત્ । ફલસ્યાશાશ્વતત્વાદેવ શેષાનુશયવશાત્પુનરાવૃત્તિસમ્ભવ ઇતિ ભાવઃ । અત એવ ગતિનિરોધકમ્ । ગતેઃ પુનરાવૃત્તિરહિતાયાઃ પરધામગતેર્નિરોધકં પ્રતિબન્ધકં ભવતીતિ શેષઃ । અત્રાશાશ્વતં ફલમેવ પતનકારણમુક્તં ભગવતા, ન કર્મ, તસ્માત્સકામકર્મૈવ દૂષયતિ ભગવાનિત્યવગન્તવ્યમ્ ।

ઈશ્વરાર્પિતં નેચ્છયા કૃતમ્ ।
ચિત્તશોધકં મુક્તિસાધકમ્ ॥ ૩॥

ઈશ્વરાર્પિતં ઈશ્વરાય વિશ્વાધ્યક્ષાય અર્પિતં ત્વમેવાસ્ય કર્મણઃ ફલં યથેષ્ટં જગતઃ કાર્યે વિનિઙ્ક્ષ્વેતિ સમર્પિતમ્ । નેચ્છયા અનિચ્છયા, નઞો ન લોપાભાવો નૈકાદિવત્ । કૃતં કર્મ ચિત્તશોધકં ચિત્તસ્ય મનસઃ શોધકં શુદ્ધિકારિ । મુક્તિસાધકં મુક્તેઃ સંસારબન્ધાદ્વિમોક્ષસ્ય સાધકં ચ ભવતિ । મનસિ શુદ્ધે હિ મોક્ષઃ સુલભઃ ।

કાયવાઙ્મનઃ કાર્યમુત્તમમ્ ।
પૂજનં જપશ્ચિન્તનં ક્રમાત્ ॥ ૪॥

તદેવ કર્મ વિભજતે । કાયવાઙ્મનઃ કાર્યં પૂજનં જપશ્ચિન્તનં ચ, કાયકાર્યં પૂજનં વાક્કાર્યં જપઃ મનઃ કાર્યં ચિન્તનં ચેતિ ક્રમાદન્વયો બોધ્યઃ । તદિદં ત્રયં ક્રમાદુત્તમમ્ । પૂજનં પ્રથમં કર્મ । તત ઉત્તમં જપાખ્યં કર્મ । તત ઉત્તમં ધ્યાનમિતિ યાવત્ । અત્ર સ્તોત્રસ્ય જપે સઙ્ગ્રહો જ્ઞેયઃ ।

જગત ઈશધીયુક્તસેવનમ્ ।
અષ્ટમૂર્તિભૃદ્દેવપૂજનમ્ ॥ ૫॥

પૂર્વશ્લોકે પૂજનશબ્દેન સામાન્યતો વિગ્રહારાધનમભિહિતમ્ । તસ્યાવરત્વેન કીર્તનાદેતદવગમ્યતે । અધુના પૂજાપ્રસઙ્ગેન સર્વકર્મોત્કૃષ્ટં વિશિષ્ટં પૂજનમેકમભિદધાતિ । જગતઃ પ્રપઞ્ચસ્ય ઈશધીયુક્તસેવનં ઈશ્વર એવેદં જગદિતિ ધિયા યુક્તં સેવનમ્ । સર્વં ખલ્વિદં બ્રહ્મ તજ્જલાનિતિ શાન્ત

ઉપાસીતે । શાણ્ડિલ્યવિદ્યોક્તમુપાસનમિતિ યાવત્ । અષ્ટમૂર્તિભૃદ્દેવપૂજનં ભવતિ । પઞ્ચમહાભૂતાનિ સૂર્યાચન્દ્રમસૌ જીવશ્ચેશ્વરસ્યાષ્ટૌ મૂર્તિવિશેષા ઉચ્યન્તે । તાભિશ્ચ મૂર્તિભિઃ સર્વં જગદાક્રાન્તમિતિ હેતોર્વિશ્વસ્યેશ્વર-ધિયોપાસનમષ્ટમૂર્ત્યુપાસનં ભવતીતિ ભાવઃ । ઇદં તુ પૂર્ણં પૂજનમ્ । નાસ્ય પૂર્વશ્લોકોક્તપૂજને સઙ્ગ્રહઃ । તસ્ય સર્વાવરત્વાદસ્ય સર્વોત્તમત્વાત્ । ધ્યાન એવાસ્ય સઙ્ગ્રહો ભવતિ । ધિય એવૈકરૂપાયા અત્ર પ્રાધાન્યાત્ । સામાન્યતઃ પૂજનં તુ શિવમૂર્તિષ્વન્યતમસ્યાઃ પૃથિવ્યાઃ સ્વલ્પૈકદેશસ્ય ભવતિ । કાયનિષ્પાદ્યં ચ ભવતિ । ઇદં તુ સર્વાસાં મૂર્તિનાં સાકલ્યેન બુદ્ધિનિષ્પાદ્યમિત્યનયોરસ્તિ ભૂયાન્વિશેષઃ ।

ઉત્તમસ્તવાદુચ્ચમન્દતઃ ।
ચિત્તજં જપધ્યાનમુત્તમમ્ ॥ ૬॥

ઉત્તમસ્તવાત્સત્યાદ્વૈદિકાત્તૃશાદાર્ષાદ્વાઽન્યસ્માત્ । ઉચ્ચમન્દતઃ ઉચ્ચાન્મન્દાદુપાંશોશ્ચ પ્રકરણાજ્જપાદિતિ શેષઃ । ચિત્તજં માનસિકં જપ-ધ્યાનં જપ એવ ધ્યાનમિત્યત્ર સમાસઃ । ન જપો ધ્યાનં ચ તયોઃ સમાહાર ઇતિ । ધ્યાનસ્ય માનસિકજપાદવ્યતિરેકાત્ । ઉત્તમં ભવતિ । સ્તોત્રવાચકોપાંશુજપેભ્યો ધ્યાનં શ્રેષ્ઠમિતિ ભાવઃ । આદ્યેષ્વપિ ત્રિષુ યથોત્તરં શ્રૈષ્ઠ્યમૂહ્યમ્ ।

આજ્યધારયા સ્રોતસા સમમ્ ।
સરલચિન્તનં વિરલતઃ પરમ્ ॥ ૭॥

આજ્યધારયા ઘૃતધારયા સ્રોતસા નદીપ્રવાહેન ચ સમમ્, સરલચિન્તનં સરલં નિત્યં સહજં નિર્યચ્ચિન્તનં ધ્યાનં વિરલતઃ મધ્યે મધ્યે વિચ્છિન્નાત્ પરં શ્રેષ્ઠમ્ । ઉત્તમે ધ્યાનેઽપિ સચ્છેદાદવિચ્છેદં શસ્યત ઇતિ યાવત્ । ધ્યાને ભક્તિરૂપસ્નેહસમ્બન્ધં સૂચયિતુમાજ્યધારૌપમ્યમ્ । નૈર્મલ્યં સૂચયિતું પ્રવાહૌપમ્યમ્ ।

ભેદભાવનાત્સોઽહમિત્યસૌ ।
ભાવનાઽભિદા પાવની મતા ॥ ૮॥

ભૂયો ધ્યાને વિશેષાન્તરમાહ ભેદભાવનાત્ ધ્યાને ધ્યાતુઃ સ્વસ્માદીશ્વરં ભિન્નં કલ્પયિત્વા યદ્ભાવનં ક્રિયતે તસ્માત્ સોઽહમિત્યસૌ ઈશ્વર એવાહમિત્યાકારકા અભિદા ભેદરહિતા ભાવના પાવની પવિત્ર મતા । ભેદેન ધ્યાનાદભેદેન ધ્યાનમુત્તમમિતિ ભાવઃ ।

ભાવશૂન્યસદ્ભાવસુસ્થિતિઃ ।
ભાવનાબલાદ્ભક્તિરુત્તમા ॥ ૯॥

ભાવનાબલાત્ અભેદભાવનાબલાદિત્યેવ સામર્થ્યાત્ । ભાવશૂન્યસદ્ભાવ-સુસ્થિતિઃ ભાવશૂન્યા સઙ્કલ્પશૂન્યા સદ્ભાવેન સત્તયા સુસ્થિતિર્નિષ્ઠા ઉત્તમા ભક્તિર્ભવતિ । ભિન્નભાવનાયાં યા ભક્તિઃ સા ત્વવરેતિ પરિશેષન્યાયાત્ સિધ્યતિ ॥

હૃત્સ્થલે મનઃ સ્વસ્થતા ક્રિયા ।
ભક્તિયોગબોધાશ્ચ નિશ્ચિતમ્ ॥ ૧૦॥

હૃત્સ્થલે આત્મનઃ સ્થાને મનઃસ્વસ્થતા મનસઃ સ્વસ્થાનસ્થિતતા । ક્રિયા કર્મ ભવતિ । ભક્તિયોગબોધાશ્ચ ભક્તિર્યોગો બોધશ્ચ ભવતિ । નિશ્ચિતમ્, ન કશ્ચિત્સંશય ઇત્યર્થઃ । મનસઃ સ્વજનિસ્થાને હૃદયેઽવતીર્ય નિષ્ઠૈવ કર્મ પર્યવસન્નં સર્વકર્મમૌલિભૂતમ્ । સૈવ ભક્તિઃ પર્યવસન્ના સર્વભક્તિમૌલિભૂતા । સૈવ યોગઃ પર્યવસન્નઃ સર્વયોગમૌલિભૂતઃ । સૈવ જ્ઞાનં પર્યવસન્નમિતિ યાવત્ ।

વાયુરોધનાલ્લીયતે મનઃ ।
જાલપક્ષિવદ્રોધસાધનમ્ ॥ ૧૧॥

વાયુરોધનાત્ વાયોઃ પ્રાણસ્ય રોધનાત્ પ્રતિષ્ટમ્ભનાન્નિયમનાદ્વા મનઃ જાલપક્ષિવત્ લીયતે આત્મનિ નિશ્ચલં રુદ્ધં ભવતિ । ઇદં રોધસાધનમ્ । પૂર્વવાક્યાર્થસ્ય કર્તૃત્વાદિદમિતિ તસ્યાક્ષેપઃ । હઠેન કુમ્ભકસ્ય સાધનં પ્રતિષ્ટમ્ભનં પ્રાણસ્ય ભવતિ । સતતં યાતાયાતપ્રત્યવેક્ષણાન્નિયમનં ભવતિ । તસ્યાપિ કુમ્ભકસંજ્ઞા રાજયોગિનાં મતેનાવિરુદ્ધા । ઉત્તરૈવ મહર્ષેરિષ્ટા પ્રક્રિયા યદયમાહ ગીતાસુ (રમણગીતાસુ) 'પ્રાણરોધશ્ચ મનસા પ્રાણસ્ય પ્રત્યવેક્ષણમ્ । કુમ્ભકં સિધ્યતિ હ્યેવં સતતપ્રત્યવેક્ષણાત્' ઇતિ ।

ચિત્તવાયવશ્ચિત્ક્રિયાયુતાઃ ।
શાખયોર્દ્વયી શક્તિમૂલકા ॥ ૧૨॥

ચિત્ક્રિયાયુતાઃ ક્રમેણ ચિતા ક્રિયયા ચ યુતાઃ ચિત્તવાયવઃ ચિત્તાનિ મનાંસિ વાયવઃ પ્રાણશ્ચ ચિદ્યુતાનિ ચિત્તાનિ ક્રિયાયુતાઃ પ્રાણાશ્ચેતિ યાવત્ । શક્તિમૂલકા શક્તિરીશ્વરશક્તિર્મૂલં યસ્યાસ્તાદૃશી શાખયોર્દ્વયી ભવતિ । આદિશક્તેર્જ્ઞાનશક્તિશાખા ચિત્તાનિ । ક્રિયાશક્તિશાખા પ્રાણા ઇતિ

તાત્પર્યમ્ । જનબહુત્વાપેક્ષયા ચિત્તપ્રાણયોર્બહુવચનેન નિર્દેશઃ । અયં ભાવઃ । યતો મનો વાયુશ્ચ શાખાદ્વયમીશ્વરશક્તેઃ, તસ્માત્તદુભયં ચ તદધિગમાય માર્ગીભવિતુમર્હતિ ।

લયવિનાશને ઉભયરોધને ।
લયગતં પુનર્ભવતિ નો મૃતમ્ ॥ ૧૩ ॥

લયો વિનાશનં ચ લયવિનાશને, ઉભયરોધને ઉભયવિધરોધને ભવતઃ । મધ્યમપદલોપસમાસઃ । લયગતં મન ઇત્યધ્યાહારઃ । પુનર્ભવતિ જાયતે । મૃતં વિનષ્ટં નો ન જાયતે । વૃત્તિમાત્રોપસંહારો લયઃ । તદ્વતો યોગિન ઉત્થાનં સમાધિશ્ચ પર્યાયેણ ભવતઃ । વૃત્તિમૂલાહઙ્કારોપસંહારો વિનાશનમ્ । તદ્વતો જ્ઞાનિનો નિત્યઃ સમાધિર્ભવતિ ।

પ્રાણબન્ધનાલ્લીનમાનસમ્ ।
એકચિન્તનાન્નાશમેત્યદઃ ॥ ૧૪ ॥

વાયુરોધનાદિતિ શ્લોકોક્તાત્પ્રાણબન્ધનાત્ પ્રાણપ્રતિષ્ટમ્ભનાત્ પ્રાણ-નિયમનાદ્વા લીનમાનસં લીનં મનઃ અદઃ એકચિન્તનાદાત્મૈક્યાનુ-સન્ધાનાન્નાશમેતિ । પ્રાણરોધો મનસો લયહેતુરેવ ભવતિ ન વિનાશન-હેતુઃ । લીને મનસ્યૈક્યાનુસન્ધાનં મનોનાશનાયેત્યર્થઃ ।

નષ્ટમાનસોત્કૃષ્ટયોગિનઃ ।
કૃત્યમસ્તિ કિં સ્વસ્થિતિં યતઃ ॥ ૧૫ ॥

સ્વસ્થિતિમાત્મનિષ્ઠામ્, યતઃ પ્રાપ્તસ્ય નષ્ટમાનસોત્કૃષ્ટયોગિનઃ કૃત્યં કિમસ્તિ । નષ્ટે મનસિ ન કિઞ્ચિત્કર્તવ્યં શિષ્યત ઇતિ ભાવઃ ।

દૃશ્યવારિતં ચિત્તમાત્મનઃ ।
ચિત્ત્વદર્શનં તત્ત્વદર્શનમ્ ॥ ૧૬ ॥

દૃશ્યવારિતં દૃશ્યેભ્યો વારિતં પરાવૃત્તમન્તર્મુખમિતિ યાવત્ । ચિત્તં આત્મનશ્ચિત્ત્વદર્શનં ભવતિ । વ્યતિરેકતો વિષયેભ્યઃ પરાવૃત્તમેવ ચિત્તમન્વયત આત્મચિત્ત્વદર્શનં ભવતીત્યક્ષરાર્થઃ । ચિત્તસ્ય બહિર્મુખત્વાભાવે નિદ્રાઽભાવે ચાન્તર્મુખં તદાત્મચિત્ત્વદર્શનરૂપમેવ પર્યવસ્યેત્ । અથાઽઽહ યદાત્મનશ્ચિત્ત્વદર્શનં તદેવ તત્ત્વદર્શનમ્ ।

માનસં તુ કિં માર્ગણે કૃતે ।
નૈવ માનસં માર્ગ આર્જવાત્ ॥ ૧૭ ॥

માનસં તુ કિં કિં સ્વરૂપ ઇતિ માર્ગણે વિચારણે કૃતે માનસં નૈવ ન પરિશિષ્યત ઇતિ ભાવઃ । વિચારયિતા સ્વયમેવ હિ માનસસ્ય સ્વરૂપમ્ । સ્વરશ્મિવિશેષત્વાન્માનસસ્ય । વિચારણસમયે સ ચ રશ્મિરાત્મન્યુપસંહૃતો ભવતીતિ તદા નૈવ માનસમિત્યુપદિશતિ ભગવાન્ । અયમેવાર્જવાન્માર્ગઃ ।

વૃત્તયસ્ત્વહં વૃત્તિમાશ્રિતાઃ ।
વૃત્તયો મનો વિદ્ધ્યહં મનઃ ॥ ૧૮॥

વૃત્તયસ્તુ અહં વૃત્તિં અહમિત્યાકારકં સઙ્કલ્પં આશ્રિતા તન્મૂલકાઃ તત્પ્રકૃતિકા ઇત્યર્થઃ । વૃત્તય એવ મનઃ સંસૃતૌ વિજૃમ્ભણકાલે । તસ્માન્મનોઽહં વિદ્ધિ । યસ્માદહંવૃત્તિમાશ્રિતાઃ સર્વા વૃત્તયસ્તસ્માત્તદ્રૂપં મનસ્તત્પ્રકૃતિભૂતાઽહંવૃત્તિરૂપં પર્યવસ્યતીતિ તાત્પર્યમ્ ।

અહમયં કુતો ભવતિ ચિન્વતઃ ।
અયિ પતત્યહં નિજવિચારણમ્ ॥ ૧૯॥

અયમહં અહઙ્કારઃ અહંવૃત્તિરૂપઃ કુતો ભવતિ ઇતિ ચિન્વતઃ માર્ગયતઃ વિચારયતઃ, અહં સોઽહઙ્કારઃ, પતતિ નાશમેતિ । ઇદમેવ નિજવિચારણમાત્મવિચારણમ્ । અયીતિ શિષ્યસમ્બોધનમ્ । અત્રાપિ વાક્યાર્થસ્ય કર્તૃત્વાદિદમિત્યાક્ષિપ્યતે ।

અહમિ નાશભાજ્યહમહંતયા ।
સ્ફુરતિ હૃત્સ્વયં પરમપૂર્ણસત્ ॥ ૨૦॥

અહમિ મનોમૂલવૃત્તિરૂપે નાશભાજિ સતિ પરમપૂર્ણસત્ પરમમખણ્ડં સચ્ચ હૃત્ સ્વરૂપં સ્વયં અહમહંતયા અહમહમિતિ ધિયા સ્ફુરતિ ભાસતે । નન્વહમિ નાશં પ્રાપ્તે કુતઃ પુનરન્યસ્યાહમઃ સમ્ભવ । ઉચ્યતે । અહન્તા વ્યક્તિત્વાન્નાતિરિચ્યતે । તન્મનોગતમાત્મગતં ચ દ્વિવિધં ભવતિ । મનોગતેઽહંભાવે નાત્મન્યહંભાવઃ । તદુપરમ આત્મનો વ્યક્તિત્વં ભાસેત । તસ્માદુક્તમેકસ્મિન્નહમિ નાશં ગતેઽન્યદહંતયા સ્ફુરતીતિ ।

ઇદમહંપદાભિખ્યમન્વહમ્ ।
અહમિ લીનકેઽપ્યલયસત્તયા ॥ ૨૧॥

ઇદં હૃત્ અહંપદાભિખ્યં અહં પદમભિખ્યા યસ્યેતિ । અહમિતિ પદં મનસિ ગૌણમાત્મનિ મુખ્યમિતિ ભાવઃ । હેતુમાહ । અન્વહં અહમિ લીનકેઽપિ મનોમયાહઙ્કારે નષ્ટેઽપિ અલયસત્તયા અનષ્ટસદ્ભાવેન ।

અયં ભાવઃ । યોઽહંપદાર્થઃ સ આત્મેતિ પામરોઽપ્યઙ્ગીકુર્યાત્ । અહઙ્કારે શાન્તે નાત્મા શાન્તો દૃશ્યતે । સ્ફુરત્યેવાહમિતિ । મનસ્તુ શાન્તં ભવતિ । એવમન્વયવ્યતિરેકાભ્યામહંપદં મનસિ ગૌણમાત્મનિ મુખ્યમિતિ સિદ્ધમ્ । કથં ગૌણં કથં મુખ્યમ્ । મનસોઽહઙ્કારસમ્બન્ધાત્તત્ર ગૌણમ્ । આત્મન્યહન્તાયાઃ સત્તારૂપેણ નિત્યં ભાનાત્તત્ર મુખ્યમ્ ।

વિગ્રહેન્દ્રિયપ્રાણધીતમઃ ।
નાહમેકસત્તજ્જડં હ્યસત્ ॥ ૨૨॥

એકસત્ એકસદ્રૂપઃ અહં વિગ્રહેન્દ્રિયપ્રાણધીતમો ન, દેહેન્દ્રિયપ્રાણબુદ્ધિરૂપં તિમિરં ન । કારણમાહ । હિ યસ્માત્કારણાત્ તદ્વિગ્રહાદિ જડં અસચ્ચ । યજ્જડં તત્કથમાત્મા । યન્નાસ્તિ તત્કથમાત્મા ।

સત્ત્વભાસિકા ચિત્ક્વ વેતરા ।
સત્તયા હિ ચિચ્ચિત્તયા હ્યહમ્ ॥ ૨૩॥

સદ્વસ્તુ કેન ભાસત ઇત્યાશઙ્ક્ય પરિહરતિ । સત્ત્વભાસિકા ઇતરા ચિત્ ક્વ વા । નેત્યર્થઃ । સત્તાં ભાસયિતુમન્યસ્યાશ્રિતો નાવસર ઇતિ યાવત્ । કારણમાહ । હિ યસ્માત્ સત્તયા ચિદ્ભવતિ યત્સત્તદેવ સ્વભાવતશ્ચિન્મયમ્ ઇત્યર્થઃ । હિ યસ્માચ્ચ કારણાત્ અહં ચિત્તયા ભવામિ । યા ચિત્સૈવ સ્વભાવતોઽહંપદાર્થ ઇત્યર્થઃ । સત્તાચિત્તાહન્તાનાં ત્રિકં સ્વભાવતઃ સમાનાધિકરણમિતિ યાવત્ । ચિદ્રશ્મિસન્બન્ધાન્મનસ્યહન્તા ગૌણીતિ પ્રાગેવાવેદિતમ્ ।

ઈશજીવયોર્વેષધીભિદા ।
સત્સ્વભાવતો વસ્તુ કેવલમ્ ॥ ૨૪॥

ઈશજીવયોઃ વેષધીભિદા ભવતિ । વેષતો ભેદશ્ચાણ્ડપિણ્ડોપાધિકૃતઃ । ધીતો ભેદઃ સર્વજ્ઞત્વાલ્પજ્ઞત્વાભ્યામ્ । એવમપિ વસ્તુ કેવલમેકમેવ । કુતઃ । સત્સ્વભાવતઃ સત્તારૂપધર્માન્વયાત્ । અત્ર કાલત્રયેઽપિ સદેવ સચ્છબ્દેનોચ્યતે । અન્યથા દૃશ્યાનાં ચ વિનશ્વરાણાં ભાનકાલિકસત્તામ્ આશ્રિત્ય સત્સ્વભાવપ્રસક્તિઃ સ્યાત્ ।

વેષહાનતઃ સ્વાત્મદર્શનમ્ ।
ઈશદર્શનં સ્વાત્મરૂપતઃ ॥ ૨૫॥

વેષહાનતઃ પિણ્ડોપાધિસમ્બન્ધભાવનાનાશનાત્ સ્વાત્મદર્શનં ભવતિ ।

અપરોક્ષ આત્માનુભવઃ સ્યાદિત્યર્થઃ । અસ્તુ સ્વાત્મદર્શનં કથમીશદર્શનં સ્યાદિતિ ચેદત્રાહ । સ્વાત્મરૂપતઃ ઈશ એવ સ્વાત્મનો રૂપમિતિ હેતોસ્તદેવેશદર્શનમ્ । શુદ્ધસ્વાત્મદર્શનાદીશદર્શનં નાપરમસ્તીતિ તાત્પર્યમ્ । વેષહીનસ્યાત્મનોઽપરિચ્છિન્નત્વાન્ન તદનુભવઃ પરિચ્છિન્નઃ, અપિ તુ પૂર્ણ એવેતિ ।

આત્મસંસ્થિતિઃ સ્વાત્મદર્શનમ્ ।
આત્મનિર્દ્વયાદાત્મનિષ્ઠતા ॥ ૨૬॥

દર્શનમિતિ પૂર્વશ્લોકોક્તપદેન ભૂયસ્ત્રિપુટીસમ્ભવમાશઙ્ક્ય પરિહરતિ । આત્મસંસ્થિતિરાત્મનિષ્ઠૈવાત્મદર્શનમ્ । ન તત્ર ત્રિપુટ્યા અવસરઃ । સા ચાત્મનિષ્ઠતા આત્મનિર્દ્વયાદ્ભવતિ । આત્મનિર્દ્વષ્ઠતાયાં દ્વૈતસમ્પર્કો લેશતોઽપિ ન વર્તિતવ્યઃ । યદિ દ્વૈતં ભાસેત તત્ર તન્મયનિષ્ઠા કથં સ્યાદિતિ તાત્પર્યમ્ ।

જ્ઞાનવર્જિતાઽજ્ઞાનહીનચિત્ ।
જ્ઞાનમસ્તિ કિં જ્ઞાતુમન્તરમ્ ॥ ૨૭॥

જ્ઞાનવર્જિતા અજ્ઞાનહીના ચ ચિત્ જ્ઞાનં ભવતિ । નનુ જ્ઞાને જ્ઞાનવર્જિતત્વં કથમિતિ ચેત્કારણમાહ । જ્ઞાતું યત્ કિઞ્ચિદિન્યદ્વેદિતું અન્તરં ભેદઃ અસ્તિ કિમ્ । નાસ્તીતિ ભાવઃ । તત્ર સ્થિતૌ ભેદાભાવાત્તદાશ્રિતલોક-પ્રસિદ્ધજ્ઞાનાભાવઃ । એવમપિ સા સ્થિતિર્જ્ઞાનમથ્યેવ પૂર્ણાનુભૂતિરૂપ-ત્વાત્ ।

કિં સ્વરૂપમિત્યાત્મદર્શને ।
અવ્યયાભવાપૂર્ણચિત્સુખમ્ ॥ ૨૮॥

કિં સ્વરૂપં કિં મે રૂપમિતિ વિચારણવિધયા આત્મદર્શને સતિ, આત્મનિષ્ઠાયાં સિદ્ધાયાં, અવ્યયં નાશરહિતં અભવમકૃત્રિમં સહજમિતિ યાવત્ । આપૂર્ણમાસમન્તાત્પૂર્ણં ચિત્સુખં સમ્પદ્યત ઇતિ શેષઃ । એતદનુભૂતિવર્ણનં ભવતિ પુનર્માર્ગપ્રદર્શનપૂર્વકમ્ ।

બન્ધમુક્ત્યતીતં પરં સુખમ્ ।
વિન્દતીહ જીવસ્તુ દૈવિકઃ ॥ ૨૯॥

દૈવિકઃ દેહાત્મભાવરહિત આત્મનિષ્ઠઃ તસ્યામવસ્થાયામેવ હિ આત્મનો દિવ્યત્વં પરિસ્ફુરેત્ । જીવસ્તુ બન્ધમુક્ત્યતીતં બન્ધમુક્તિભ્યામતીતં

પરં સુખમાનન્દં વિન્દતિ પ્રાપ્નોતિ । બન્ધસ્ફૂર્તિસાપેક્ષા મુક્તિસ્ફૂર્તિઃ । તસ્માદજ્ઞાનિનાં વ્યવહાર એવ સાઽવસ્થ મુક્તિરિત્યભિધીયતે । અનુભવિનો બન્ધસ્ફૂર્તિરહિતસ્ય મુક્તિસ્ફૂર્તિરપિ નાસ્તીતિ તસ્ય સાવસ્થા બન્ધ-મુક્ત્યતીતૈવ વક્તવ્યા ।

અહમપેતકં નિજવિભાનકમ્ ।
મહદિદં તપો રમણવાગિયમ્ ॥ ૩૦॥

અહમપેતકં અહમા મનોમૂલાહઙ્કારેણ અનાત્મગતયાઽહંવૃત્યેતિ યાવત્ । અપેતકં વિયુતં નિજવિભાનકં સ્વરૂપવિભાનં ઇદં મહત્તપઃ । આત્મનો-ઽપ્યહમહંતયા સ્ફુરણાદહમપેતકમિત્યત્ર ગૌણસ્યાહંભાવસ્ય નિરાસો બોધ્યઃ । સર્વેભ્યસ્તપેભ્યો નિત્યમાત્મસ્ફુરણં મહત્તપ ઇતિ તાત્પર્યમ્ । ઇયં રમણવાક્ રમણસ્ય મહર્ષેર્વાક્ ઇયમિત્યનેન સર્વસ્યાપિ ગ્રન્થસ્ય ગ્રહણમ્ । નૈતચ્છ્લોકમાત્રસ્ય । સ એષ ઉપદેશસારસ્ત્રિંશતા શ્લોકાનાં નિબદ્ધો ભગવતો રમણસ્ય મહર્ષેર્વિજયતેતરાં વિજયતેતરામ્ ।

ઇતિ શ્રીભગવન્મહર્ષિરમણાન્તેવાસિનો વાસિષ્ઠસ્ય નરસિંહસૂનોર્ગણપતેઃ કૃતિઃ ઉપદેશસારભાષ્યં સમાપ્તમ્ ।

વિભવાબ્દે જ્યેષ્ઠમાસે પૌર્ણમ્યાં ભાનુવાસરે ।
ચન્દ્રોપરાગસમયે ભાષ્યમેતદુદીરિતમ્ ॥

From The Collected Works of Vasishtha Kavyakantha Ganapati Muni Vol 07-31
Proofread by Sunder Hattangadi

*UpadeshasaraBhashyam*
pdf was typeset on April 5, 2025

Please send corrections to *sanskrit@cheerful.com*